*अवधारणा* AWADHARANA
[ A Peer-Reviewed, Open Access Journal ]
ISSN : 2505-080x (Print)
Volume 8, September 2024
Published by Creative Democrat Academy

# सूत्रेऽनुक्तानां पाणिनिपूर्ववर्तीनां सूत्रोक्तानाञ्च शब्दशास्त्रकृतां परिचयात्मकमनुशीलनम्

**भानुभक्त आचार्यः, विद्यावारिधिः**
**उपप्राध्यापक,**
**विन्दुवासिनीसंस्कृतविद्यापीठम्,पोखरा**

*Article History : Submitted 19 April 2024; Reviewed 3 June 2024; Accepted 11 July. 2024*
*Author: Bhanubhakta Acharya Email : bhanuacharya2018@gmail.com.*

**लेखसारः**

पौरस्त्यवाङ्मये शब्दशास्त्रकाराणां वैयाकरणानां परिचयात्मकानुशीलनं सुस्पष्टरूपेण विहितं न मिलति । अस्मिन् गवेषणामूलके लेखे संस्कृतव्याकरणसम्बद्धानां पाणिनिपूर्ववर्तिनां महर्षिणा पाणिनिना अष्टाध्यायीग्रन्थेऽनुक्तानां सूत्रे समुल्लिखितानाञ्च शब्दशास्त्रकाराणां परिचयमूलकं गवेषणं विहितं वर्तते । अष्टाध्याय्यां नामाङ्कनरहितानां पाणिनितः पूर्ववतिनां महेश्वरस्य, बृहस्पतेः, इन्द्रस्य, वायोः, भारद्वाजस्य, भागुरेः,पौष्करसादेः,चन्द्रस्य,चारायणस्य, काशकृत्स्नस्य,वैयाघ्रपद्यस्य, माध्यन्दिनेः, रौढेः, शौनकेः, गौतमस्य, व्याडेः, शन्तनोश्चेति सप्तदशसङ्ख्यकानां वैयाकरणनाम्, पाणिनिना सूत्रे स्मृतानां काश्यपस्य, आपिशलेः, गार्ग्यस्य, गालवस्य, चाक्रवर्मणस्य, भारद्वाजस्य, शाकटायनस्य, शाकल्यस्य, सेनकस्य, स्फोटायनस्येति दशसङ्ख्यकानाञ्च व्याकरणकाराणां परिचयात्मकं गवेषणं प्रस्तुते लेखे कृतं वर्तते । अत्र अष्टाध्याय्यां नामाङ्कनरहितानां पाणिनितः पूर्ववर्तिनां पाणिनिसूत्रे स्मृतानाञ्च शब्दशास्त्रकाराणां परिचयः कीदृश इति शोधप्रश्नो निर्धारितो वर्तते । उत्तरमपि पुनः पुनः संशोध्य शोधप्रश्नानुसारेणैवानुशीलनं विधाय आलेखोऽयं निर्मितो वर्तते । अस्मिन् परिचयात्मकेऽनुशीलनकर्मणि पुस्तकालयस्य प्रयोगो विहितो वर्तते । सम्बद्धानां विषयाणां विशेषरूपेण अध्ययनाय प्राथमिकस्रोतसा व्याकरणसम्बद्धा ग्रन्था द्वितीयस्रोतस्सामग्रीरूपेण ऐतिहासिकग्रन्थाः प्रयुक्ताः सन्ति । सङ्कलितसामग्रीणां विश्लेषणे निष्कर्षनिष्पादनविधिः प्रयुक्तो वर्तते । अत्र क्वचिद् निगमनात्मकविधिं स्वीकृत्य कुत्रचिच्चागमनात्मकविधेः प्रयोगं विधाय विषयाणां विश्लेषणं मापनं खण्डनं मण्डनञ्च विधाय सत्यापनकार्यं सम्पाद्य लेखोऽयं रचितोऽस्ति ।

स्रोतस उद्धरणे सन्दर्भाङ्कने च एपिए पद्धतिः प्रयुक्ता वर्तते । पाणिनीये सूत्रे नामाङ्कनरहितानां शब्दशास्त्रकृतां परिचयान्वेषणाय संस्कृतव्याकरणकारसम्बद्धानां ऐतिहासिकग्रन्थानां सम्यगनुशीलनं विहितम् । पाणिनीये सूत्रे स्मृतानां वैयाकरणनां परिचयनिर्धारणार्थं भट्टोजिदीक्षितप्रभृतिविरचिताः कौमुदीग्रन्था अन्विष्टा वर्तन्ते । व्याकरणशास्त्रस्य पठनकर्मणि पाठनकार्ये च संस्कृतविश्वविद्यालयस्य व्याकरणविषयस्य पाठ्यक्रमे संस्कृतव्याकरणकाराणां परिचयमूलकमितिहाससम्बद्धं विषयं निर्धारितमस्ति । पाठ्यसामग्र्यभावेन पाठकाः छात्राश्च काठिन्यमनुभवन्ति । तत्काठिन्यमपहर्तुं शोधमूलकोऽयं लेखः सरलं सहाय्यं भवतीति चास्यलेखस्योपलब्धि र्वर्तते ।

***विशेषशब्दा :*** वैयाघ्रपद्यः, व्याडिः, चाक्रवर्मणः, स्फोटायनः, कातन्त्रम्

**विषयप्रवेशः**

सर्वेषां प्राणिनां भावाभिव्यक्तये भाषा हि भगवता संरचिता महती सम्पत्ति वर्तते । लोके प्रचलन्तीषु सर्वास्वपि मानवप्रयुक्तासु भाषासु व्याकरणस्य प्रवृत्तिरावश्यकी । व्याकरणं विना भाषा चिराय जीवितुं न शक्नोति । यस्या भाषाया व्याकरणं सुदृढं परिमार्जितं परिष्कृतञ्च वर्तते, सैव भाषा अनन्तानन्त-वत्सरेष्वपि जीविता भवति । संस्कृतभाषाया व्याकरणं परिष्कृतं परिमार्जितञ्च वर्तते । अतो वैदिक-कालादारभ्य रामायणमहाभारतकाले प्रयुक्तभाषाया अद्यत्वे प्रयुक्तसंस्कृतभाषायाश्च मध्ये तात्त्विकं पार्थक्यं नास्ति । परिष्कृता परिशुद्धा व्याकरणसम्बन्धिदोषरहिता भाषासंस्कृतभाषेति कथ्यते । देवभाषा गीर्वाणवाणी भारती इत्यादीनि संस्कृतभाषायाः पर्यायवाचकानि पदानि ।

यस्यां कस्यामपि भाषायां व्याकरणसम्बद्धा नियमा निर्धारिता वर्तन्ते । विधिप्रक्रियाऽनुसारेण प्रयोगकरणाय इदं पदं शुद्धम्, इदं पद्यमशुद्धम्, इदं वाक्यं शुद्धमिति ज्ञानाय एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुक् भवति इति महाभाष्यकारवचनस्य भाषायां व्यवहारे च सम्यक् पालनाय व्याकरणशास्त्रस्य महती भूमिका वरीवर्ति । ग्रन्थेषु कतिपयानां शब्दशास्त्रप्रणेतॄणां परिचयः सारल्येन लभ्यते । कतिपयाना-मितरेषामनुशीलनं कर्तव्यं भवति । अतः पाणिनिपूर्ववर्तिनां महेश्वरादिसप्तदशसत्त्यकानां पाणिनिसूत्रेषु स्मृतानां काश्यपापिशलिप्रभृतीनां दशसत्त्यकानाञ्च परिचयः सारल्येन अनुपलब्धेः तेषां परिचयात्मकानुशीलनकरणाय अध्येतुः यत्नो वर्तते ।

**समस्याकथनम्**

अनुसन्धानस्य समस्याकथनम् अधोलिखितानुसारेण वर्तते -

(क) सूत्रेऽनुक्तानां पाणिनिपूर्ववर्तीनां शब्दशास्त्रकाराणां परिचयः कीदृशः ?

(ख) सूत्रपठितानां पाणिनिपूर्ववर्तीनां शब्दशास्त्रकाराणां परिचयः कीदृशः ?

**उद्देश्यकथनम्**

समस्याकथनानुसारेण उद्देश्यकथनम् निम्नरीत्या वर्तते -

(क) पाणिनिसूत्रेऽनुक्तानां पाणिनिपूर्ववर्तीनां शब्दशास्त्रकाराणां परिचयात्मकमनुशीलनम् ।

(ख) पाणिनिसूत्रे पठितानां पाणिनिपूर्ववर्तीनां शब्दशास्त्रकाराणां परिचयात्मकमनुशीलनम् ।

**कृतकार्यस्य समीक्षा**

वैयाकरणसिद्धान्तकौमुद्या भूमिकायां काशीस्थ राजकीयसंस्कृतमहाविद्यालयस्य प्राध्यापकचरः बालकृष्णशर्मा पञ्चोलि (ई.सं.१९६६) लिखति । ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥ इति नवव्याकरणानि प्रसिद्धानि । केचित् जयन्त्यष्टादि शाब्दिका इति च स्वीकुर्वन्ति । तत्र प्रथमशाब्दिकविषये महाभाष्ये प्रोक्तम् 'एवम् हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम' तेनानुमीयते अध्ययनानुकूलं शब्दपरिगणनरूपं व्याकरणं तेन विरचितमिति किन्तु विषयेऽस्मिन् विदुषां वैमत्यं प्रतिभाति । तैत्तिरीयसंहितायां वाचं व्याकुरू इति देवैरिन्द्रः प्रार्थितः । ऐन्द्रव्याकरणविषये श्रीश्यूआन् चुआन् महोदयः कथयति 'व्याकरणसम्बन्धिनियमा इन्द्रेण स्थिरीकृता'

इति । सामवेदस्य ऋक्तन्त्रे इदमक्षरं छन्दसां वर्णशः समनुक्रान्तम् । यथाऽचार्या ऊचु र्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाजः ऋषिभ्यः ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते । न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिरिति । शाब्दिकाचार्यपरम्परायां पाणिनेः पूर्वं आग्निवेश्य आग्निवेश्य आग्निवेश्यायन आग्रायण आत्रेयादयः पञ्चषष्ठिसत्त्यका आसन् ।

सम्पूर्णानन्दविश्वविद्यालयस्यानुस्न्धाननिर्देशको भागीरथत्रिपाठी (२०३८) श्लोकसिद्धान्तकौमुद्याः प्रथमभागस्य प्रस्तावनाखण्डे कथयति वेदाङ्गेषु मुखस्थानं व्याकरणं भजते प्रामुख्यम्, व्याकरणमन्तरा वेदव्याख्यानं शक्यमकर्तुमिति तदाकूतम् । ऐन्द्रापिशलिकाशकृत्स्नशाकटायनादीनि बहूनि व्याकरणानि भगवतः पाणिनेः प्रागिह विराजन्ते स्म । यद्यपि पाणिनिना प्राक्तना दश वैयाकरणा अष्टाध्याय्यां स्मृता अपि तेषां सर्वेषां व्याकरणानामनुपलम्भात् साम्प्रतं पाणिनीयव्याकरणमेव प्राचीनतमं राजते । व्याकरणशास्त्रस्येतिहासनामकः पुस्तकलेखको लोकमणिदाहालः (२०४६) कथयति महावैयाकरणेन पाणिनिनाऽनुल्लिखितानामाचार्याणामपि सुदीर्घा परम्पराऽस्ति । तेषां नामलेखनकार्यं पाणिनिना अष्टाध्याय्यां किमर्थं न विहितमिति विषये वयं किमपि तथ्यं प्रस्तोतुमसमर्थाः स्म । माहेश्वरसम्प्रदायानुसार्यपि पाणिनि माहेश्वरस्य तद्विरचितव्याकरणानां नाममपि नोल्लिखति किमुतान्यानि ।

अष्टाध्यायीग्रन्थस्य पूर्वपीठिकालेखनक्रमे गोपालदत्तपाण्डेयः (ई.सं.१९९२) लिखति पाणिनिसूत्राणामर्थं विशदीकर्तुं प्राचीनकालादेव बहवो वृत्तिकाराः प्रयतनपरा अभूवन् । तेषु व्याडिकुणि प्रभृतिभिराचार्यै र्गुम्फिता वृत्तयः सुप्रसिद्धा आसन्, किन्तु अनुपलब्धिहेतो र्न ता समुपलभ्यन्ते वर्तमाने काले । संस्कृतवाङ्मय का बृहदितिहासनामके ग्रन्थे तृतीये पृष्ठे बलदेव उपाध्याय (२०५८) उल्लिखतिपाणिनेः पूर्वमनेके शब्दशास्त्रकारा बभूवुः, तेषामितिवृत्तज्ञानं परमावश्यकं वर्तते । परन्तु प्रसिद्धानां प्राचीनवैयाकरणानां परिचयस्यान्वेषणं विधाय पाणिनिना सह योजयितुं काठिन्यमुपस्थितं वर्तते । एताभिः पूर्वोक्ताभिश्चर्चाभिः पाणिनिसूत्रेऽनुक्तानां पाणिनिपूर्ववर्तीनां पाणिनिसूत्रोक्तानाञ्च शब्दशास्त्रकाराणां परिचयात्मकमनुशीलनमध्ययनमद्यावधि प्रकृते विषये केनाऽपि विहितं नास्तीति हेतो शोधान्तरालं स्पष्टतया दृश्यते। अतो विधीयमानंमध्ययनमौचित्यपूर्णमिति कार्येऽस्मिन् अध्येतुः प्रयत्नः ।

**अध्ययनविधिः**

शब्दशास्त्रकारणां परिचयगवेषणे प्रस्तुतमिदमध्ययनं केन्द्रितमस्ति । अत अत्र प्रयुक्तो विधि र्गवेषणामूलको वर्तते । सङ्कलितसामग्रीणां विश्लेषणे निष्कर्षनिष्पादनविधिः प्रयुक्तो वर्तते । अत्र क्वचिद् निगमनात्मकविधिं स्वीकृत्य कुत्रचिच्चागमनात्मकविधेः प्रयोगं विधाय विषयाणां विश्लेषणं मापनं खण्डनं मण्डनञ्च विधाय सत्यापनकार्यं सम्पाद्य लेखोऽयं रचितोऽस्ति । स्रोतस उद्धरणे सन्दर्भाङ्कने च एपिए पद्धतिः प्रयुक्ता वर्तते ।

**पाणिनिसूत्रेऽनुक्तानां पाणिनिपूर्ववर्तीनां शब्दशास्त्रकाराणां परिचयमूलकमनुशीलनम्**

पाणिनिसूत्रे नामाङ्कनरहितानां पाणिनिपूर्ववर्तीनां संस्कृतव्याकाराणामुपस्थिति वैदिकसमये रामायण-महाभारतपुराणेतिहासादिकाले, अन्येषां महत्त्वपूर्णग्रन्थरचनावेलायां महत्त्वपूर्णा आसीत् । सृष्ट्यादौ ब्रह्मणो भगवान् परमात्मा मनसा वेदं प्रकाशितम् । तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः (व्यासः,२०५९,पृ.२१)। परमात्मन आगतानामन्यासां विद्यानां प्रथमो वक्ता यथा ब्रह्मा तथैव संस्कृतव्याकरणस्यापि प्रथमो प्रवक्ता

ब्रह्मा एव । इदं संस्कृतव्याकरणमादौ ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्यो ऋषयो ब्राह्मणेभ्यः प्रोचुः । ततो नेपालस्य भारतवर्षस्य च गिरिकन्दरेषु नदीतटेषु हिमालयस्य कच्छेषु गुहायाञ्च उषित्वा महर्षिभि र्व्याकरणनिर्माणपरम्परा प्रारब्धा । तस्मिन् समये अव्याकृता प्रकृतिप्रत्ययविभागर हिता भाषा आसीत् । अस्या उपदेशः प्रतिपदोक्तपाठमाध्यमेन विधीयते स्म । बृहस्पतिरिन्द्राय दिव्यसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच  तथापि नान्तं जगाम । प्रतिपदोक्तपाठोपदेशे महान् परिश्रमो जातः । महता कालेनापि पूर्णता नैव लब्धा । एतत्सर्वं ज्ञात्वा देवा इन्द्रमब्रुवन् यद् भवान् अस्या वाण्याः प्रकृतिप्रत्ययविभागं करोतु इति तैत्तिरीयसंहितायामुक्तम्– "वाग्वै पराच्यव्याकृतावदत् ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति  (मीमांसकः, २०५१, पृ.२१)  इति । पुरन्दरः तामखण्डां वाचं विच्छिद्य प्रकृतिप्रत्ययविभागं विधाय सरलीचकार । ततः संस्कृतभाषा देवभाषेति नाम्ना प्रथिता अभूत् । अनया रीत्या संस्कृतव्याकरणस्य इन्द्र आदिकर्ता स्वीक्रियते । सोऽयं (हनुमान्) नवव्याकरणार्थवेत्ता (वाल्मीकिः,२०५३, किष्.का.३/२९) इति रामायणस्य उक्त्यनुसारेण संस्कृतस्य नवव्याकरणानि ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनं सारस्वतम् आपिशलं शाकल्यं पाणिनीयमितिप्रसिद्धानि वर्तन्ते । व्याकरणपरम्परायां पाणिनेः पूर्ववर्तिनां केषाञ्चिद् वैयाकरणानां नामोल्लेखनमष्टाध्याय्यामुलभ्यते । पाणिनेः प्राक्तनानां कतिपयवैयाकरणानां नामोल्लेखनं नास्ति । कतिपये च दिङ्मात्रेण सङ्केतिताः सन्ति । तेषामष्टाध्याय्यां नामाङ्कनरहितानां पाणिनितः पूर्ववतिनां महेश्वरस्य, बृहस्पतेः, इन्द्रस्य, वायोः, भारद्वाजस्य, भागुरेः,पौष्करसादेः,चन्द्रस्य,चारायणस्य, काशकृत्स्नस्य,वैयाघ्रपद्यस्य, माध्यन्दिनेः, रौढेः, शौनकेः, गौतमस्य, व्याडेः, शन्तनोश्चेति सप्तदशसङ्ख्यकानां व्याकरणकाराणां परिचयात्मकं गवेषणमूलकमनुशीलनमित्थमस्ति ।

***महेश्वरः***

अष्टाध्यायीग्रन्थे सप्तदशसङ्ख्यकानां वैयाकरणानां नामोल्लेखनं नास्ति । तेषु महेश्वरः प्रथमो वर्तते ।  महेश्वरेण निर्मितं माहेश्वरव्याकरणं सुविस्तृतं सर्वाङ्गपूर्णञ्चासीत् । सिद्धान्तकौमुद्याम् इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि इत्युक्त्वा माहेश्वरव्याकरणस्य स्थितिः संरक्षिता  वर्तते । महेश्वरेण महाभारतस्य  शान्तिपर्वणि  वेदात् षडङ्गान्युद्धृत्य प्रवचनं  विहितमिति कथनं मिलति (व्यासः, २०५३, पृ. २८४/१९२) । षडङ्गेषु मुख्यं व्याकरणम् । अतो व्याकरणस्य प्रवर्तको महेश्वर इति निश्चीयते । श्लोकमाध्यमेनाप्युक्तम् – समुद्रवद् व्याकरणं महेश्वरे तदर्द्धकुम्भोद्धरणं बृहस्पतौ । तद्भागभागाच्च शतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ ॥ (मीमांसकः, २०५१,पृ.८५) इति । अतः महेश्वरे सर्वाङ्गपूर्णं व्याकरणमासीदिति निश्चीयते ।

***बृहस्पतिः***

शब्दशास्त्रकारो देवानां पुरोहितो महर्षेरङ्गिरसः पुत्रो बृहस्पति र्व्याकरणस्य च  वक्तासीत् । बृहस्पति र्हि पारायणनामकव्याकरणस्य प्रवाचकः । देवराज इन्द्रश्चास्य  शिष्यः । महाभाष्येऽप्युक्तम् बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच इति (पतञ्जलिः, ई.सं.२००२, पृ.२५) । अतो बहुभिः प्रमाणै र्बृहस्पतिव्याकरणस्य स्थितिः सुप्रसिद्धा भवति ।

***इन्द्रः***

शब्दशास्त्रकारेण इन्द्रेण विरचिते अथ वर्णः समूहः, अर्थः पदम्  इति ऐन्द्रव्याकरणस्य द्वे सूत्रे अधुनो

पलभ्येते । अत इन्द्रव्याकरणस्यावस्थितौ सूत्रद्वयं प्रमाणिकं तथ्यं स्वीक्रियते । कतिपये विद्वांसः तमिलव्याकरणे न सह ऐन्द्रव्याकरणस्य तुलनां कुर्वन्ति । महावीरेण विहितमैन्द्रव्याकरणस्य प्रवचनं जैनेन्द्रव्याकरणनाम्ना प्रसिद्धमिति व्याकरणविदो वदन्ति ।

***वायुः***

वायुपुराणे वायुः शब्दशास्त्रविशारद आसीदिति विवरणं लभ्यते । वाणीं व्याकुर्वता इन्द्रेण वायोः साहाय्यं प्राप्य प्रकृतिप्रत्ययविभाजनकार्यं विहितम् । वायुना ब्रह्मणा सह ज्ञानं लब्धमिति प्रसिद्धम् । वायुपुत्रो हनुमान् पितृसदृशः शब्दशास्त्रज्ञ आसीदिति वाल्मीकिरामायणे विवरणमुपलभ्यते (वाल्मीकिः २०५३, उ. का. ३६, ४७ )। अतो वायुरपि शब्दशास्त्रकाररासीदिति ।

***भरद्वाजः***

गुरुणा इन्द्रेण सह शब्दशास्त्रकारेण भरद्वाजेन व्याकरणतन्त्रं पठितम् । ऋक्तन्त्रे च "ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्यो ऋषयो ब्राह्मणेभ्यः । (मीमांसकः, २०५१,पृ.६६) इति वर्णनम्मिलति । बृहस्पते रग्रजस्योतथ्यस्य ममताख्यपत्न्यां बृहस्पतिवीर्याज्जातो हि भरद्वाजमुनिः । (पराशरः, २०५४, ४, १९) इति विवरणं लभ्यते । यजुःप्रातिशाख्ये भरद्वाजमाख्यातम् इति निर्दिष्टम् । ऋतो भारद्वाजस्य कृकर्णपणाद् भारद्वाजे (पा. सू. ४।२।१४५) इत्यत्र पठितो भारद्वाजस्तु भरद्वाजस्य सन्ततिः तद्देशीयो वा वर्तते । स च महाभारतकालिक वर्तते । महाभारते च भरद्वाजोऽपि हि भगवान् आरूरोह दिवं तदा । (व्यासः,२०५३, १,१३०) इति वर्णनं समुपलभ्यते ।

***भागुरिः***

वायुपुराणानुसारेण भागुरि र्बृहद्गर्गस्य शिष्य आसीत् । अयमष्टाध्यायीग्रन्थेऽनुल्लिखितो वर्तते । वैयाकरणसिद्धान्तकौमुद्याम्

वष्टि भागुरिरल्लोपमवाप्योरूपसर्गयो : ।
आपञ्चैव हलन्तानां यथा वाचा निशा दिशा ।। (दीक्षितः, ई.सं. १९९९, पृ. ५७०)

इति श्लोकद्वारा स्मृतो भागुरिरपि व्याकरणस्य कर्ता आसीदिति प्रमाणान्तरै र्ज्ञायते । अनेन भागुरि व्याकरणम्, सामशाखासंहिता, व्राह्मवचनम्, अलङ्कारशास्त्रम्, साख्यदर्शनभाष्यम्, मनुस्मृतिभाष्यम्, देवताग्रन्थः, राजनीतिशास्त्रादयो ग्रन्था विरचिता युधिष्ठिरमीमांसकः स्वीकरोति ।

***पौष्करसादिः***

पुष्करे सीदतीति पुष्कसद् तस्यापत्यं पौष्करसादिराचार्यः । चयो द्वितीया शरि पौष्करसादेरिति वाच्यम् इति वार्तिके, नादिन्याक्रोशे पुत्रस्य (पा.सू. ८,४,४८) इति सूत्रस्य भाष्ये च व्याकरणकर्ता पुष्करसादिः स्मर्यते। 'इन्द्रश्चान्द्रापिशलिगार्ग्यगालवपौष्करैः' इति वर्णनं तैत्तिरीयमैत्रायणीप्रातिशाख्येषु उपलभ्यते । पौष्करसादिः कृष्णयजुर्वेदस्यान्यतमशाखायाः प्रवक्ता आसीत् ।

***चन्द्रः***

चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः इति वचनात् चन्द्रेण निर्मितं चान्द्रव्याकरणं पूर्वमासीदिति अनुमीयते। सिद्धान्तकौमुद्यां चान्द्रस्तु मन्तु अपराधे इति ञितं पठितम् । वनु याचने परस्मैपदी पठितः । भर्तृहरिरपि

चन्द्रकृतव्याकरणमासीदिति स्वीकरोति । अयं हि चन्द्रगोमीनाम्नापि प्रसिद्धो व्याकरणकारः ।

***चारायणः***

देवपालेन विरचितस्य लौगाक्षिगृह्यसूत्रस्य व्याख्यायां चारायणः स्मृतो वर्तते । वृद्धिर्यस्याचामादिस्तद् वृद्धम् (पा.सू.१ । १ । ७३ ) इति सूत्रभाष्ये कम्बलचारणीयाः, ओदनपाणिनीयाः, घृतरौढीया इति पठितम् । अतः कृष्णयजुर्वेदस्य चारायणशाखायाः शिक्षायाश्च निर्मातुः चारायणो वैयाकरण आसीदित्यवगम्यते ।

***काशकृत्स्नः***

भृगुवंशीयस्य कशकृत्श्नस्य पुत्रः काशकृत्स्नो महावैयाकरण आसीत् । पाणिनिसूत्रे न क्वापि चर्चितः काशकृत्स्नः शब्दशास्त्रकाररूपेण प्रसिद्धोऽस्ति । काशकृत्स्नतन्त्रे १४२ सूत्राणि, धातुपाठे च पाणिनीयापेक्षया ४५० धातवोऽधिका विद्यन्ते । वाक्यपदीयटीकायां हेलाराजः, कविकल्पद्रुमे वोपदेशः, काशिकाया अमोघावृत्तौ च त्रिकं काशकृत्स्नम्/काशकृत्स्नीयम् इत्युल्लेखाद् औदिच्य-संस्कृतसम्बध्दं काशकृत्स्नव्याकरणं बृहदासीदित्यवबुद्ध्यते ।

***वैयाघ्रपद्यः***

पाणिनिशब्दानुशासने न क्वापि चर्चितो वैयाघ्रपद्यः व्याकरणकाररूपेण प्रथितो वर्तते । काशिकावृत्तौ शुष्किका शुष्कजङ्घा च इत्यादि वैयाघ्रपद्यकारिका उल्लिखिता वर्तन्ते । ऋदुशनस् पुरूदंशोऽनेहसां च (पा. सू. ७। १। ९४) इति सूत्रस्य पदमञ्जर्याञ्च नपुंसके व्याघ्रपदां वरिष्ठः, इति वर्णनं मिलति । तथा च सङ्ख्यायाः संज्ञासंघसूत्राध्ययनेषु (पा. सू. ५। १। ५८) इति सूत्रस्य काशिकायां दशकं वैयाघ्रपदीयम् इत्युल्लिख्य दशाध्यायात्मकं वैयाघ्रपद्यव्याकरणस्य कलेवरं स्वीकृतमस्ति ।

***माध्यन्दिनिः***

ऋदुशनस् पुरूदंशोऽनेहसां च (पा.सू.७।१।९४) इति सूत्रस्य काशिकावृत्तौ वैयाकरणत्वेन समुल्लिखितस्य माध्यन्दिनेश्चर्चा रूपमालायां प्रक्रियाकौमुद्या भूमिकायाञ्च 'इकः षण्ढेऽपि संबुद्धौ गुणो माध्यन्दिनेर्मते' एवम्प्रकारेण विहिता वर्तते । मध्यन्दिनस्य पुत्रोऽयं माध्यन्दिनि शुक्लयजुर्वेदस्य माध्यन्दिनीयशाखायाः प्रवक्तासीत् ।

***रौढिः***

उरूत्तरपदादौपम्ये (पा. सू. ४। १। ६९) इति सूत्रस्य भाष्ये रौढ्यादिषूपख्यानात् इत्युक्तम् । कार्तकौजपादयश्च (पा. सू. ६। २। ३७) इति सूत्रे वामनश्च घृतरौढीया इति समुल्लिखति । अत रौढिव्याकरणकाररूपेण रौढेः सशक्ताः समुपस्थितिरासीत् । धनधान्यसम्पन्नस्य घृतप्रियस्य रौढे र्व्याकरणमधुना नोपलभ्यते ।

***शौनकिः***

ब्रह्मवेत्तु र्गृहपतेः शौनकस्य पुत्रः शौनकि र्महावैयाकरण आसीत् । शौनकि निर्मितव्याकरणसम्बधीनि मतानि 'करोतेरपि कर्तृत्वे दीर्घत्वं शास्ति शौनकिः' इति चरक व्याख्यायां जज्भट उल्लिखति । भट्टिकाव्यस्य जयमङ्गलटीकायामपि धाञ्कृञोस्तनिवध्योश्च बहुलत्वेन शौनकिः ३ । ४७ । इति समुल्लेखेन च शास्त्रे शौनकिर्व्याकरणकाररूपेण प्रसिद्धो वर्तते ।

***गौतमः***

आचार्योपसर्जनश्चान्तेवासी (पा.सू.६।२।३) इति सूत्रभाष्ये आपिशल-पाणिनीयव्याडीय गौतमीयाः इति

समुल्लेखो मिलति ।अतो गौतमोऽपि व्याकरणकर्तृत्वेन स्मारितो वर्तते ।अस्य गौतमधर्मशास्त्रम् गृह्यसूत्रञ्चास्यान्ये कृतयः समुपलभ्यन्ते ।

***व्याडिः***

आचार्यो नागेशः संग्रहकाररूपेण व्याडिं स्मरति । पाणिनेर्मातुलस्य व्याडेर्नामान्तरं दाक्षायणः । अस्य नाम पाणिनीयाष्टके न क्वापि निर्देशितः । 'इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्, इत्युल्लेखं विधाय भाषावृत्तौ पुरूषोत्तमदेवो व्याडिं स्मरति । व्याकरणमहाभाष्ये व्याडेर्नाम बहुत्र समायाति । लक्ष्यश्लोकात्मकः, संग्रहग्रन्थः, परिभाषापाठः, व्याडीयपरिभाषावृत्तिः, लिङ्गानुशासनमित्यादयो हि अनेन निर्मिता ग्रन्थाः (मीमांसकः, २०५१,पृ.३२०) वर्तन्ते । उभयप्राप्तौ कर्मणि (पा.सू. २।३।६६) इति सूत्रभाष्ये शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः इत्युक्त्वा पतञ्जलिना व्याडेः संग्रहग्रन्थस्य च बहुत्र प्रशंसा विहिता वर्तते ।

***शन्तनुः***

पाणिनीयाष्टके चर्चाविहीनो फिट्सूत्रकारः शन्तनुरपि शब्दशास्त्रकारो वर्तते । शेखरद्वये नागेशः शन्तन्वाचार्येण विहितानि फिट्सूत्राणि (मीमांसकः, २०५१,पृ.३४२) इति समुल्लिखति । स च पाणिनेः पूर्ववर्ती वैयाकरणः । द्वारादीनां च (पा. सू. ७। ३। ४) इति सूत्रे पदमञ्जरीकारो हरदत्तः 'सः पुनः शन्तनुप्रणीतः फिष्' इत्यादिकं स्मरति ।

एते सप्तदश व्याकरणकारा व्याकरणादिविभिन्नग्रन्थकर्तृत्वेन अनेकेषु शास्त्रेषु तट्टीकायाञ्च बहुत्र चर्चिताः सन्ति । पाणिनीयाष्टके एतेषां नाम नैव सङ्केतितो वर्तते । पुनः कतिपयाचार्याणां नामोल्लेखस्तु आरगुदिचाम् (पा. सू. ४। १। १३०), हलि सर्वेषाम् (पा. सू. ८। ३। २२) इत्यादिषु सूत्रेषु प्राच्यौदिच्यदाक्षिणत्याचार्यत्वेन सर्वशब्देन च कृतो वर्तते । विभिन्नप्रातिशाख्येषु अनेकब्राह्मणग्रन्थेषु च तेषां मतं सुरक्षितं वर्तते । पाणिनीयाष्टके अनुल्लिखितस्य सौनागस्य नाम 'कर्मणि निष्ठायाञ्च शकेरिटमिच्छन्ति विकल्पेन' इत्याद्यनेकस्थले भाष्यकारेण सप्तवारं स्मृतो वर्तते भाष्ये । तथा चात्र सूत्रार्थप्रयोजनादिविषये पाणिनिना सह समानमतावलम्बिनां शब्दशास्त्रकाराणां नामोल्लेखः पाणिनीयाष्टके न लभ्यते । भिन्नमतावलम्बिनां विरोधिनां नामोल्लेखनकार्यन्तु अष्टाध्यायीग्रन्थे लभ्यत इति समुपलब्धिः ।

**अष्टाध्यायीसूत्रे प्रोक्तानां शब्दशास्त्रकाराणां परिचयमूलकमनुशीलनम्**

शब्दसाधुत्वप्रतिपादनाय व्याकरणस्मृतेः शब्दशास्त्रकुलगुरु र्वर्तते महर्षिः पाणिनिः । विश्वविश्रुतो गौरवमयः सूत्रमयश्च वर्तते पाणिनेरष्टाध्यायीग्रन्थः । अनेन विरचिता व्याकरणस्मृतिः सूत्रेषूपनिबद्धा अष्टभिरध्यायैश्च गुम्फिता वर्तते ।अत एव अष्टाध्यायीति नाम्ना व्यवह्रियते ।लौकिकवैदिकोभयप्रक्रियायाः शब्दानुशासनत्वादिदं निखिलव्याकरणराशिशिरोरत्नरत्नायमानमस्ति । अष्टाध्यायीग्रन्थे यः कोऽपि शब्दोऽनर्थको नास्ति । तदुक्तं वृद्धिरादैच् (पा .सू. १ । १ । १ ) इति सूत्रभाष्ये भाष्यकारेण । पाणिनीयाष्टके सूत्राणामति-देशाधिकारानुवृत्तिभिः किमप्यनर्थकं नैवास्तीति इको यणचि (पा. सू. ६ । १ । ७७ ) इति सूत्रभाष्ये 'सामर्थ्ययोगान्नहि किञ्चिदस्ति पश्यामि शास्त्रे यदनर्थकं स्यात्' इत्युक्त्वा प्रतिपादितं वर्तते । (पतञ्जलिः, ई. सं. २००२ पृ. १२७) अलौकिकप्रज्ञाद्योतितेन शेषावतारेण पतञ्जलिना उदक् च विपाशः (पा.सू. ४ । २ । ७४) इति सूत्रस्य भाष्ये 'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य' इत्युल्लिखितमस्ति । ऋग्वेदस्य भाष्यकारो वेंकटमाधवश्च 'शाकल्यः

पाणिनिर्यास्क इत्यृगर्थपरास्त्रयः' इत्युद्धृत्य ऋग्वेदस्य त्रिषु ज्ञातृषु मध्ये पाणिनिरन्यतमो वर्तत इति स्वीकरोति । पाणिनीयाष्टकस्य महत्त्वं न केवलं प्राच्यदेशीयविद्वद्भिरस्माभिश्चोद्घोष्यते, अपि तु पाश्चात्त्यदेशीयविद्वांसः समीक्षकाश्च पाणिनिव्याकरणं प्रति नतशिरस्काः सन्ति (मीमांसकः, २०५१, पृ.२३४) ।

अकालको हि पाणिने अष्टाध्यायीग्रन्थः । प्रमाणञ्च कालोपर्सजने तुल्यम् (पा. सू. १। २।५७) प्रधान-प्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्(पा.सू.१।२।५६)इति सूत्रद्वयम्।तत्र हि प्रधानप्रत्ययार्थवचनभूतभविष्यदनद्यतनादिका लोपोपर्सजनविषयिका परिभाषा लोकप्रमाणत्वाद् नैवोल्लिखिता । पाणिनेः पूर्ववर्तिषु व्याकरणेषु तु एतेषां विस्तरेणोल्लेखः प्राप्यते । सूत्राणां लघुकरणम्, सूत्राणां सुबोध्यता, विषयस्य क्रमबध्दता, प्रस्तुतीकरणस्य वैज्ञानिकता, सम्पूर्णता, संज्ञा-प्रत्यहारानुवृत्तेर्व्यवस्था, विषयसामान्यीकरणस्य व्यवस्था, गणपाठस्य व्यवस्था इत्यादीनि पाणिनेरष्टाध्यायीग्रन्थस्य वैशिष्ट्यानि (आचार्य : २०७० पृ.९६ ) सन्ति । महर्षिणा पाणिनिना अष्टाध्याय्यां दशव्याकरणकारणां नामान्युल्लिखितानि वर्तन्ते । यैः सह सूत्रार्थप्रयोजनादिविषये मनागपि मतभेद आसीत् तेषां नामोल्लेख अष्टाध्यायीग्रन्थे पाणिनिना विहितो वर्तते । ते च यथा आपिशलिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः, स्फोटायनश्चेति दशसत्त्यका वर्तन्ते ।

***आपिशलिः***

पिश्यते इति पिशलः पिशलो हि क्षुद्रः न पिशलो ऽ पिशलः, अपिशलस्यापत्यं आपिशलिः । आपिशलिपदं छात्र्यादिगणे पठितमस्ति । पाणिनिकाले आपिशलेः पाठशालायाः प्रसिद्धिः देशान्तरेष्वपि आसीत् । अयमुत्तरभारतीयो विद्वान् आसीत् । अस्य व्याकरणस्य वर्णनं महाभाष्ये मिलति । अनेन विदुषा रचितानि एकादशसंख्यकानि व्याकरणस्य सूत्राणि युधिष्ठिरमीमांसकेन संकलितानि सन्ति । भाषवृत्तौ शब्दशक्तिप्रकाशिकायां कातन्त्रवृत्तेः दुर्गटीकायामपि आपिशलिना रचिताः श्लोकाः समुद्धृताः सन्ति । शब्दशास्त्रकारस्य आपिशले र्मतं वा सुप्यापिशलेः (पा.सू.६।१।९२) इति सूत्रे भाष्ये च समुद्धृतं वर्तते । वामनेन, न्यासकारेण जिनेन्द्रबुद्धिना, कैयटमैत्रेयरक्षितादिविद्वद्भिश्च स्वनिर्मिते ग्रन्थे आपिशले र्मतं समुद्धृतं वर्तते ।

***काश्यपः***

अष्टाध्यायीग्रन्थे व्याकरणकर्तुः काश्यपस्य मतं सूत्रद्वये समुल्लिखितं वर्तते । तृषिमृषिकृषेः काश्यपस्य (पा. सू. १। २। २५) नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (पा. सू. ८। ४। ६७) काश्यपकौशिकाभ्यामृषिभ्यां णिनिः (पा. सू.४। ३। १०३) इति सूत्रस्य कात्यायनवार्तिके विभिन्नानां सूत्राणां भाष्ये च काश्यपस्य मतं विवेचितं वर्तते । यजुःप्रातिशाख्ये, कणादस्य सूत्रे, पिङ्गलस्य छन्दशास्त्रे काश्यपस्य मतानि उपस्थापितानि सन्ति । वायुपुराणस्य वक्तुः काश्यपस्य आयुर्वेदसंहितायाः श्लोका विभिन्नग्रन्थेषूपलभ्यन्ते ।

***गार्ग्यः***

निरुक्तस्यापि विद्वान् गार्ग्य आयुर्वेदप्रवर्तकस्य धन्वतरेः शिष्य आसीदिति सुश्रुतटीकाकारो डल्हणः स्वीकरोति (मीमांसकः, २०५१, पृ. १७५) । पाणिनीयाष्टके सूत्रत्रये शब्दशास्त्रकारस्य गार्ग्यस्य मतमुल्लेखितमस्ति । यथा ओतो गार्ग्यस्य (पा. सू. ८। ३ ।२०) अट् गार्ग्यगालवयोः (पा. सू. ७।३।९९) (नोदात्तस्वरितोदयमगार्ग्य–काश्यपगालवानाम् (पा. सू.८।४।६७) । सामवेदस्य पदकारेण गार्ग्येण शालाक्यतन्त्रम्, भूवर्णनम्, तक्षशास्त्रम्, लोकायतशास्त्रम्, देवर्षिचरितम्, सामतन्त्रमित्येते ग्रन्था विरचिता इति युधिष्ठिरमीमांसकः स्वीकरोति । प्रातिशाख्येऽपि

गार्ग्यस्य मतं उद्धृतं वर्तते । नैरुक्ताचार्येषु गार्ग्यं विहाय सर्वेऽपि सर्वं नाम आख्यातजमाह इत्यङ्गीकुर्वन्ति ।

***गालवः***

धन्वन्तरिशिष्यो व्याकरणकारो गालवः पुराणकवि आसीत् । अष्टाध्याय्यीग्रन्थे व्याकरणकारो गालवः सूत्रचतुष्टये सङ्केतितो वर्तते । यथा इको ह्रस्वोऽङ्योगालवस्य (पा.सू.६।३।६१), अट् गार्ग्यगालवयोः (पा.सू.७।३।९९), तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (पा.सू.७।१।७४), (नोदात्तस्वरितोदयमगार्ग्यकाश्यप-गालवानाम् (पा.सू. ८।४।६७) । पुरूषोत्तमदेवः इको यणचि (६।१।७७) इति सूत्रस्य भाषावृत्तौ इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम् इति गालवमतं समुल्लिख्य दधियत्र मधुवरिः त्रियम्बकम् इत्यादिप्रयोगा अपि मिलन्ति तथा च भूवादयो धातवः (पा.सू.१।३।१) इति सूत्रमस्य प्रमाणत्वेन संस्थापयति । संहितापाठः, ब्राह्मणः, क्रमपाठः, शिक्षा, निरूक्तम्, देवताग्रन्थः, शाकल्यतन्त्रम्, कामसूत्रम्, भ्रूवर्णनमित्येते ग्रन्था रचिता इति भगवद्दत्तस्य मतं वर्तते ।

***चाक्रवर्मणः***

शब्दशास्त्रकारेण कश्यपस्य पुत्रेण चाक्रवर्मणेन 'नियतकालाः स्मृतयः, इति मतमवलम्ब्य द्वय इति पृथक्शब्दं स्वीकृत्य द्वयेषामित्यत्र सर्वनामप्रयुक्तकार्यं विहितम् । माघेन शिशुपालवधमहाकाव्ये १२।१३ प्रयुक्तमिदं पदं भट्टोजिदीक्षितेन सर्वादीनि सर्वनामानि (पा.सू.१।१।२७) इति सूत्रे शब्दकौस्तुभे चाक्रर्वमणस्य मतेन ' द्वयशब्दस्यापि सर्वनामताभ्युपगमात्, इति पूर्वपक्षत्वेन इतरमतमुपस्थापितम् । तथा चात्रद्वयशब्दः- तयप्स्थानिभिन्नः स्वतन्त्रोऽयच्प्रत्ययान्तो भाष्ये स्वीकृतो वर्तते, अतः पूर्वोक्तं मतं खण्डितमित्यन्येषां मतम् । ई चाक्रवर्मणस्य (पा.सू.६।१।१३०) इति सूत्रे चर्चितस्य चाक्रवर्मणस्य प्रसिद्धिः शब्दशास्त्रे स्फुटिताऽस्ति ।

***भारद्वाजः***

बृहस्पतेः पौत्रो भरद्वाजस्य च पुत्रो द्रोणाचार्यः शब्दशास्त्रकारो भारद्वाज एव मन्त्रद्रष्टा आसीदिति महाभारते प्रसिद्धः । इडागमादिविधौ ऋतो भारद्वाजस्य (पा. सू. ७। २। ६३) इति सूत्रे कृकणपर्णाद् भारद्वाजे (पा. सू. ४। २। १४५) इति सूत्रे च व्याकरणकर्तु र्भारद्वाजस्य मतं विवेचितं वर्तते । भारद्वाजस्य वार्तिकानि, आयुर्वेदस्य संहिता, अर्थशास्त्रमेते ग्रन्था अनेन रचिता वर्तन्ते ।

***शाकटायनः***

शब्दशास्त्रकारस्य शाकटायनस्य नाम पाणिनिना सूत्रत्रये सूचितमस्ति । जातिगुणक्रियाद्रव्य (यदृच्छा) इति शब्दानां चतुष्टयिप्रवृत्तिर्मध्ये द्रव्यं विहाय त्रयीशब्दानां प्रवृत्तिपक्षपोषकः शाकटायन आसीत् । शाकटायनेन यास्केन च नामान्याख्यातजानीति मतं स्वीकृतमस्ति (भट्टः, १९९८, पृ. १२०) । लङः शाकटायनस्य (पा. सू. ३। ४। १११), व्योर्लघुप्रयत्नतरः शाकटायनस्य (पा. सू. ८।३।१८), त्रिप्रभृतिषु शाकटायनस्य (८। ४। ५०) इति सूत्रत्रये शाकटायनस्य मतं सूक्ष्मतया विश्लेषितं वर्तते । शाकटायनेन लौकिकवैदिकपदान्वाख्यानाय दैवतग्रन्थः, निरूक्तम्, कोषः, ऋक्तन्त्रम्, सामतन्त्रम् पञ्चपादात्मकमुणादिसूत्रम्, श्राद्धकल्पश्चेति ग्रन्था विरचिता वर्तन्ते ।

***शाकल्यः***

शब्दशास्त्रकारस्य शाकल्यस्य नामोल्लेखः पाणिनीयाष्टके सूत्रचतुष्टये मिलति । सम्बुद्धौ शाकल्यस्ये तावनार्षे (पा.सू.१।१।१६), इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (पा.सू.१।१।१२७), लोपः शाकल्यस्य (पा.सू.६।१।१९),

सर्वत्र शाकल्यस्य (पा. सू. ८। ४। ५१) इति । अनेन ऋग्वेदस्य संहितापाठस्य पदक्रमजटादण्डपाठानाञ्च प्रवचनं वात्स्यमुद्गल-शालीयगोसत्यशिशिरशिष्येभ्य उपकाराय विहितम् । अनेन शाकलव्याकरणम्, शाकलचरणम्, पदपाठः, माध्यन्दिनपाठश्चेति ग्रन्था निर्मीताः सन्ति ।

***सेनकः***

शब्दशास्त्रकारस्य सेनकस्य नामोल्लेखः पाणिनीयाष्टके गिरेश्च सेनकस्य (पा. सू. ५। ४। ११२) इति सूत्रे विहितो वर्तते । जिनेन्द्रबुध्दिहरदत्तनागेशादयो वैयाकरणाः सूत्रे ऽस्मिन् सेनकग्रहणं पूजार्थमिति स्वीकुर्वन्ति। सेनकस्येतिवृत्तविषये तदीये विरचिते कृतिविषये च व्याकरणशास्त्रस्येतिहासपरिचायको ग्रन्थरन्वेष्टव्यो वर्तते ।

***स्फोटायनः***

स्फोटप्रतिपादनपरकाचार्यस्य व्याकरणकारस्य नामोल्लेखः पाणिनीयाष्टके अवङ्स्फोटायनस्य (पा. सू. ६ । १ । १३३ )इति सूत्रे विहितो वर्तते । भरद्वाजस्य यन्त्रसर्वस्वं नामके ग्रन्थे चित्रिण्येवेति स्फोटायनः, इत्युल्लेखाद् स्फोटायनस्य प्राचीनत्वं सिद्ध्यति । स्फोटोऽयनं परायणं यस्य स स्फोटायनः, स्फोटवाद एव वैयाकरणानां प्रधानो वादः । भरतमिश्रस्तु स्फोटायनस्यापरं नाम औदुम्बरायण इति कथयति । स्फोटविषयकज्ञानाय सत्यकामवर्मणा विरचितं 'संस्कृतव्याकरण का उद्‌भव और विकास, नामकं पुस्तकं पठनीयं वर्तते ।

पाणिनिपूर्ववर्तिनां दशानामेव व्याकरणकाराणामुल्लेख अष्टाध्याय्यां वर्तते । पाणिनिपूर्ववर्तिनाम् अष्टाध्याय्यामनुल्लिखितानां प्रोक्तानां व्याकरणकाराणां मतानि सूत्राणि च विविच्य मुख्योपजीव्यस्रोतांसि सङ्ग्रहं विधाय पाणिनिना अष्टाध्यायीग्रन्थो निर्मितः । संस्कृतव्याकरणनिर्माणक्रमे एतदतिरिक्ता पाणिनितो भिन्नपरम्परा पाणिनीयेतरव्याकरणपरम्परा अपि प्रथिता वर्तते । सा यथा–

१ कौमारकलापस्य कातन्त्रव्याकरणपरम्परा ।

२ चन्द्रयोगिनः (गोमिनः ) चान्द्रव्याकरणपरम्परा ।

३ शाकटायनव्याकरणपरम्परा ।

४ देवनन्दिनो जैनेन्द्रव्याकरणपरम्परा ।

५ हेमचन्द्रस्य हैमशब्दानुशासनपरम्परा ।

६ वोपदेशस्य मुग्धबोधव्याकरणपरम्परा ।

७ भोजदेवस्य सरस्वतीकण्ठाभरणव्याकरणपरम्परा ।

८ नरेन्द्रानुभूतिस्वरूपाचार्ययोः सारस्वतव्याकरणपरम्परा ।

९ रूपगोस्वामिनो हरिनामामृतव्याकरणपरम्परा ।

एतत्परम्परासम्बन्धिनो इमे ग्रन्था विभिन्नपुस्तकालयेषु समुपलभ्यन्त इति युधिष्ठिरमीमांसकः समुल्लिखति (उपाध्यायः, २०५८, पृ. ४६५) । यथा पाणिनिव्याकरणपरम्परायां वार्तिकभाष्यटीकादयो ग्रन्थलेखनपरम्परा प्रचलिता । तथैव पाणिनीयेतरव्याकरणपरम्परायां दशाधिकटीकाकारो व्याख्यातारस्तेषामपि परम्परा प्रचलिता वर्तते ।

**निष्कर्षः**

अष्टाध्याय्यीग्रन्थे नामाङ्कनरहिताद् भगवतो महेश्वरादारभ्य अद्य यावत् प्रचलितायां सुमहत्यां व्याकरणनिमर्माणपरम्परायां शब्दशास्त्रकारै र्व्याकरणस्य विविधविषयमवलब्य ग्रन्था निर्मिताः सन्ति । पाणिनिपूर्ववर्तिनां पाणिनिसूत्रेऽनुक्तानां महेश्वरस्य, बृहस्पतेः, इन्द्रस्य, वायोः, भारद्वाजस्य, भागुरेः, पौष्करसादः, चन्द्रस्य,चारायणस्य, काशकृत्स्नस्य,वैयाघ्रपद्यस्य, माध्यन्दिनेः, रौढेः, शौनकेः, गौतमस्य, व्याडेः, शन्तनोश्चेति सप्तदशसङ्ख्यकानां व्याकरणकाराणां सङक्षिप्तपरिचयात्मकं गवेषणमूलकमनुशीलनं कृतिमुखेनात्र विहितम्। एवमेव भगवता पाणिनिना विरचिते अष्टाध्याय्यीग्रन्थस्य सूत्रपाठे नामाङ्कितानां आपिशलिः, काश्यपः, गार्ग्यः, गालवः,चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः, स्फोटायनश्चेति दशसत्त्यकानां शब्दशास्त्र-काराणां कृतिमुखेन सङक्षिप्तपरिचयमूलकमनुशीलनमत्र प्रस्तुतम् । पाणिनिसूत्रेऽनुक्तानां प्रोक्तानाञ्च वैयाकरणानां तद्विरचितानां कृतीनां परिचयः संस्कृतविश्वविद्यालयेन निर्मिते पाठ्यक्रमे निर्धारितो वर्तते । पाठ्यवस्तुरूपेण निर्धारिते कौमुद्यादिग्रन्थे तु नोपलभ्यते । अत उपर्युक्तानां शब्दशास्त्रकाराणां कृतिमुखेन विहितेन परिचयात्मकानुशीलनकार्येण संस्कृतव्याकरणाध्यायिनो छात्राःसंस्कृतवाङ्मयप्रेमिणः पाठकाः सनातनीयो वैदिकवाङ्मयध्यायी समाजश्च लाभान्विता भवन्ति । अयमेव गवेषणामूलकस्यास्य लेखस्योपलब्धिः सामाजिकं मूल्यञ्च ।

**सन्दर्भग्रन्था :**


आचार्यः, भानुभक्तः (२०७०), पाणिन्यनुच्चरितपूर्ववैयाकरणानां गवेषणम्, *ऋतम्भरा* १३ (१६), ९६–१०५ ।

उपाध्यायः, बलदेवः (२०५८), *संस्कृतवाङ्मयका बृहद् इतिहास*, (पञ्चदश-खण्ड), उत्तरप्रदेशसंस्कृतसंस्थानम् ।

दाहालः, लोकमणिः (ई.स. १९९०), *व्याकरणशस्त्रेतिहासः*, भारतीयविद्याप्रकाशन ।

दीक्षित : भट्टोजिः (ई.सं. १९९९), *वैयाकरणसिद्धान्तकौमुदी*, सम्पा. गोपालदत्त पाण्डेयः (प्र.भा, पं.सं.), चौखम्बासुर भारती प्रकाशन ।

दीक्षितः भट्टोजिः, (२०६६ ), *शब्दकौस्तुभः*, (प्र.भा. तृ.सं.), चौखम्बासंस्कृत सिरीज आफिस ।

पतञ्जलिः (ई.सं. २००२), *व्याकरणमहाभाष्यम्*, अनु. चारूदेव शास्त्री, पु. मु. सं., मोतीलाल बनारसीदास

पराशरः (२०५४), *विष्णुपुराणम्*, अनु. मुनिलाल गुप्त (अष्टा. सं.), गीताप्रेस, ।

पाणिनिः (ई.सं.१९९२), *अष्टाध्याय्यी*, सम्पा. गोपालदत्त पाण्डेयः, च. सं., चौखम्बासुरभारती प्रकाशन ।

भट्टः, नागेशः (ई.सं. १९९८), *परमलघुमञ्जूषा*, (द्वि.सं.), चौखम्बा सुरभारती प्रकाशन ।

मिश्रः, जगदीशचन्द्रः (ई.सं.२००९), *वैदिकवाङ्मयस्येतिहासः*, (पु. मु. सं.), चौखम्बा सुरभारती प्रकाशन ।

मीमांसकः, युधिष्ठिरः (२०५१), *संस्कृतव्याकरणशास्त्र का इतिहास*, (प्र. भा.), रामलाल कपुर ट्रष्ट प्रेस ।

मीमांसकः, युधिष्ठिरः (२०३०), *संस्कृतव्याकरणशास्त्र का इतिहास*, (तृ. भा.), रामलाल कपुर ट्रष्ट प्रेस ।

वाल्मीकिः (२०५३), *वाल्मीकिरामायणम्*, (द्वि. ख), षो.सं., गोरखपुर : गीताप्रेस वि.सं. ।

वेदव्यासः (२०५३), *महाभारतः*, अनु. रामनारायणदत्त शास्त्री पाण्डेयः (न. सं.), गीताप्रेस